# संस्कृत-वार्ता:

**दिनाङ्क :-15.07.2024**

**प्रात: - 06:55**

**प्रधानमंत्री**

प्रधानमन्त्रिण: नरेन्द्रमोदिन: एक्स इति सामाजिक अन्तर्जाल पटले अनुयायिनां संख्या दशकोटितोप्यधिका सञ्जाता। अवधेयमस्ति यत् विगतत्रिवर्षेषु प्राय: त्रि कोटि: वृद्धि: अभवत्। सम्प्रति श्री मोदिन: अधुना विश्वस्य नेतृषु सर्वाधिका: अनुयायिन: सन्ति।

-

**अमित शाह-महाविद्यालय**

केन्द्रीय गृहमन्त्रिणा अमितशाहेन मध्यप्रदेशस्य सर्वेष्वपि पंचपंचाशत् जनपदेषु प्रधानमन्त्री उत्कृष्टत महाविद्यालयानाम् उद्घाटनं कृतम्। श्रीशाहः अवोचत् यत् नूतनशिक्षानीतेः उद्देश्यं यून: विकसितभारताय सज्जीकरणम् अस्ति।

श्रीमोदिना आगामि पंचविंशति: वर्षाणां आवश्यकता सम्पूर्तये नूतनशिक्षानीतिं आनेतुं कार्यं कृतम् । अनया नूतनशिक्षानीत्या भारतस्य छात्राः विश्वस्य छात्रैः सह स्पर्धां कर्तुं समर्थाः भविष्यन्ति अपरञ्च अस्मदीया: छात्रा: सहस्रवर्षपुरातनसंस्कृत्या सह भाषाभिः सह सम्बद्धा: भवेयु:।
गृहमन्त्रिणा प्रोक्तं यत् प्रधानमन्त्रीउत्कृष्टतमहाविद्यालयानां स्थापनायाः उपक्रमस्य उद्देश्यं प्रदेशस्य छात्राणां कृते उत्तमं उच्चगुणवत्तायुक्तं च शिक्षाप्रदानं वर्तते। सः नूतनशिक्षानीते: सर्वप्रथमं कार्यान्वयनार्थं, हिन्दी भाषायां चिकित्सा-अभियन्त्रणशात्रयो: पाठनं आरंभार्थं मध्यप्रदेशप्रशासनस्य प्रशंसाम् अकरोत् ।
इतः प्राक् गृहमन्त्रिणा इन्दौर जनपदे "एक पेड माँ के नाम' इत्यस्याभियानस्य समारम्भ: अकारि। इन्दौर-जनपद द्वारा एकस्मिन्नेव दिवसे एकादश लक्षवृक्षाणां रोपणं कृत्वा वैश्वविक् कीर्तिमत: स्थापना करिष्यते।

-

**बिड़ला-भारतीय प्रवासी**

लोकसभाध्यक्ष: ओमबिडला: रूसदेशस्य मास्को नगरे भारतीय प्रवासिन: सम्बोधयन् सबलं प्रोक्तवान् यत् विदेशस्था: भारतीया: भारतस्य विकासाय, तस्याधुनिकीकरणाय च अभिन्ना: भागधेया: सन्ति। तेन राष्ट्रनिर्माणे निरतान् प्रवासिन: प्रति कार्तज्ञभावान् प्रकटयता प्रोक्तं यत् एते प्रवासिन: रूसदेशे भारतस्य राजदूतरूपेण स्थित्वा स्वकार्याचरणै:, योगदानादिभिश्च रूसे भारतस्य छविं सम्मार्जयन्त: सन्तीति।

**नेपाल-ओली**

रामचन्द्रपौडेलेन नेपालस्य अग्रिम प्रधानमन्त्रित्वेन के. पी. शर्मा ओली नियुक्त:। असौ पुष्पकमल दहल प्रचण्डस्य स्थानं अवाप्स्यति। श्री प्रचंडस्य शुक्रवासरे प्रतिनिधिसभायां विश्वास मतस्य पराजयं जातम्, तेन कारणात् नूतनप्रशासनं निर्मितं भवति। अद्य ओली शपथग्रहणं विधास्यति।

**हमारा-संविधान**

न्यायं यावत् पूर्णत: प्रापणाय नवोन्मेषी समाधानप्रारूपाय च DISHA इत्याख्य: कार्यक्रम: अस्य मासस्य षोडशदिनाङ्के प्रयागराजनगरे भविष्यति। कार्यक्रमोऽयं भारतीय-संविधानस्य स्वीकरणाय, भारतीयगणतन्त्रस्य पञ्चसप्ततिवर्षपूर्ताविधौ उत्सवत्वेन परिपाल्यते। अभियानस्यास्य उद्देश्यं वर्तते यत् संविधानाभिज्ञानस्य वरीवर्धनेन सह न्याय्याधिकारेषु अभिरूच्यभिवर्धनञ्चेति। आयोजनकाले नागरिकाणां सहयोगाभिवर्धनाय ‘हमारा सम्विधान-हमारा सम्मान’ इत्याख्यं वेबफलकमपि अस्ति समुद्घाटितम्।

**क्रिकेट**

क्रिकेट प्रतिस्पर्धायां भारतीय दलेन जिम्बाब्वेदलं चत्वारि – एकं इत्यंकान्तरालेन पराजितम्। इयं श्रृंखला टी-20 क्रीडाया: अन्तिमा च आसीत् यत्र भारतेन द्विचत्वारिंत् अंकै: विजयं अवाप्तम्।

**।।इति वार्ता:।।**